# Shri Matribhuteshvara Stotram

# શ્રીમાતૃભૂતેશ્વરસ્તોત્રમ્

## Document Information

Text title : Shri Matrribhuteshvara Stotram 02 16

File name : mAtRRibhUteshvarastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-16

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

Shri Matribhuteshvara Stotram

# શ્રીમાતૃભૂતેશ્વરસ્તોત્રમ્

પ્રસન્નવક્ત્રમેકદન્તમાદિપૂજ્યમીશ્વરં
સુરાસુરેન્દ્રસેવ્યમાનપાદપદ્મમવ્યયમ્ ।
સમસ્તશોકનાશકારણં સુખપ્રદં નૃણાં
ઉમાસુતં નમામિ તં સમસ્તવિઘ્નશાન્તિદમ્ ॥ ૧॥

અજાયમાનમપ્યનેકધા સુજાયમાનમું(?)
પુરાણમપ્યહં યુવાનમાદિકારણં શિવમ્ ।
અપાણિપાદમપ્યનેકપાદપાણિચક્ષુષં
નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૨॥

અનન્તરૂપનામધેયમપ્યનામરૂપકં
કપાલભિક્ષમપ્યશેષલોકસર્વકામદમ્ ।
અનાથમપ્યશેષલોકનાથમીશમચ્યુતં
નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૩॥

અજીવમપ્યનન્તજીવરક્ષકં સુજીવિનં
મહાન્તમપ્યણું હૃદિ સ્થિતં ન દૃશ્યમીડિતમ્ ।
બહિઃસ્થિતં નરામરૈઃ સ્વભક્તનેતૃગોચરમ્ ।
નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૪॥

ઉમાવચઃપ્રતિપ્રભાષણાજ્ઞમપ્યધીશ્વરં
સુવાગ્મિનામપિ પ્રિયં જિતેન્દ્રિયોત્તમં રતૌ ।
અજય્યમપ્યુમામુદે સુમેષુણા વિનિર્જિતં
નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૫॥

કુરઙ્ગલોચનાઽગજાવિલાસહર્ષમાનસં
ગજાસ્યશૌરિબાલકેલિદર્શનાતિવિસ્મિતમ્ ।
સુનન્દિબાણભૃઙ્ગિચણ્ડિરાવણાદિપૂજિતં
નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૬॥

સુમૃત્તિકાશિલાદિષૂધિયામપીષ્ટદાયકં (?)
    સુપુત્રનીલકણ્ઠનામધેયવક્તુરિષ્ટદમ્ ।
મૃગં હરેષુમાહરેતિ વક્તુરાશુ મુક્તિદં
    નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૭॥

સમસ્તલોકદગ્ધુકામકાલકૂટભક્ષકં
    ભિષગ્વરં ત્રિવિષ્ટપસ્ય માતૃભૂતમીશ્વરમ્ ।
મૃકણ્ડુસૂનુરક્ષણાય મૃત્યુદર્પભઞ્જકં
    નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૮॥

અનાથગર્ભિણીસ્ત્રિયઃ શિશોઃ સુતસ્ય મે સદા
    સુખપ્રદં સુમાતૃવત્ શરણ્યમેવ નાન્યથા ।
કૃપારસાર્દ્રમાનસેશમચ્યુતપ્રિયં શિવં
    નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૯॥

સુગન્ધિકુન્તલામ્બિકાસમેતમદ્રિવાસિનં
    સમીપવર્તિરઙ્ગનાથજમ્બુકેશ્વરપ્રભુમ્ ।
અનાથગર્ભિણીવધૂસુખપ્રસૂતિકારકં
    નમામિ માતૃભૂતસામ્બમૂર્તિમેવ સન્તતમ્ ॥ ૧૦॥

ઇયં સમસ્તકામદા નવપ્રસૂનમાલિકા
    નૃણામશેષકર્મજન્યશોકકક્ષપાવકા ।
સુદર્શનાખ્યપણ્ડિતેન ભક્તિયુક્તચેતસા
    વિલિખ્યતે શિવપ્રસાદલેશલાભવૈભવાત્ ॥ ૧૧॥

યા કૃપા ગર્ભિણીત્રાણે યા કૃપા મુનિનન્દને ।
માતૃભૂતેશ્વર ક્ષિપ્રં સા કૃપા મયિ દીયતામ્ ॥ ૧૨॥

યા કૃપા મુનિસન્ત્રાણે યા કૃપા કપિનાયકે ।
યા વિભીષણરક્ષાયાં સા કૃપા મયિ દીયતામ્ ॥ ૧૩॥

    અગ્રતઃ પૃષ્ઠતશ્ચૈવ પાર્શ્વતશ્ચ મહાબલૌ ।
આકર્ણપૂર્ણધન્વાનૌ રક્ષેતાં રામલક્ષ્મણૌ
    (અધશ્ચોર્ધ્વં ચ રક્ષેતાં રામકૃષ્ણૌ ધનુર્ધરૌ) ॥ ૧૪॥

॥ ઇતિ શ્રીમાતૃભૂતેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

---

*Shri Matribhuteshvara Stotram*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*